# आदित्य हृदय स्तोत्रम्

**ध्यानम् :** नमस्सवित्रे जगदेक चक्षुषे
जगत्प्रसूति स्थिति नाश हेतवे ।
त्रयीमयाय त्रिगुणात्म धारिणे
विरिंचि नारायण शंकरात्मने ॥

१. ततो युद्ध परिश्रान्तं समरे चिन्तया स्थितम्
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्
२. दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्
उपागम्याब्रवीद्राम मगस्त्यो भगवानृषिः
३. राम राम महाबाहो शृणु गुह्यं सनातनम्
येन सर्वानरीन्वत्स समरे विजयिष्यसि
४. आदित्य हृदयं पुण्यं सर्वशत्रु विनाशनम्
जयावहं जपेन्नित्यमक्षय्यं परमं शिवम्
५. सर्वमंगल मांगल्यं सर्वपापप्रणाशनम्
चिन्ताशोक प्रशमन मायुर्वर्धनमुत्तमम्
६. रश्मिन्तं समुद्यन्तं देवासुर नमस्कृतम्
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरं
७. सर्वदेवात्मकोह्येष तेजस्वी रस्मिभावनः
एष देवासुर गणान् लोकान्पाति गभस्तिभिः
८. एष ब्रह्मा च विष्णुश्च शिवस्स्कन्दः प्रजापतिः
महेंद्रो धनदः कालो यमस्सोमो ह्यपांपतिः
९. पितरो वसवस्साध्या ह्यश्विनौ मरुतो मनुः
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः
१०. आदित्यस्सविता सूर्यः खगः पूषा गभस्तिमान्
सुवर्ण सदृशो भानुर्हिरण्यरेता दिवाकरः
११. हरिदश्व स्सहस्रार्चि स्सप्तसप्तिर्मरीचिमान्
तिमिरोन्मथन श्शंभु स्त्वष्टा मार्तांड अंशुमान्
१२. हिरण्यगर्भ श्शिशिर स्तपनो भास्करो रविः
अग्निगर्भोऽदितेःपुत्र श्शंखश्शिशिरनाशनः
१३. व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः
घनवृष्टि रपांमित्रो विन्ध्यवीथीप्लवंगमः
१४. आतपी मंडली मृत्युः पिंगळ स्सर्वतापनः
कविर्विश्वो महातेजा रक्तस्सर्व भवोद्भवः
१५. नक्षत्र ग्रह ताराणा मधिपो विश्वभावनः
तेजसामपि तेजस्वी द्वादशात्म न्नमोस्तुते

१६. नमः पूर्वाय गिरये पश्चिमायाद्रये नमः
ज्योतिर्गणानां पतये दिनाधिपतये नमः
१७. जयाय जय भद्राय हर्यश्वाय नमो नमः
नमोनम स्सहस्रांशो आदित्याय नमो नमः
१८. नम उग्राय वीराय सारंगाय नमो नमः
नमः पद्मप्रबोधाय मार्तांडाय नमो नमः
१९. ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः
२०. तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः
२१. तप्तचामीकराभाय वह्नये विश्वकर्मणे
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे
२२. नाशयत्येष वै भूतं तदेव सृजति प्रभुः
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः
२३. एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः
एष चैवाग्नि होत्रं च फलं चैवाग्निहोत्रिणां
२४. वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः
२५. एन मापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च
कीर्तयन् पुरुषः कश्चि न्नावसीदति राघव
२६. पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि
२७. अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि
एवमुक्त्वा तदागस्त्यो जगाम च यथागतम्
२८. एतच्छ्रुत्वा महातेजा नष्टशोकोभवत्तदा
धारयामास सुप्रीतो राघवः प्रयतात्मवान्
२९. आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान्
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्
३०. रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्
सर्वयत्नेन महता वधे तस्य धृतोभवत्
३१. अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपति संक्षयं विदित्वा
सुरगण मध्यगतो वचस्त्वरेति ॥

***इत्यार्ष्ये श्रीमद्रामायणे युद्धकांडे आदित्य हृदय स्तोत्रं संपूर्णम्***

ध्येयस्सदा सवितृमंडल मध्यवर्ती
नारायणस्सरसिजासन सन्निविष्टः ।
केयूरवान् मकरकुंडलवान् किरीटी
हारी हिरण्मयवपु र्धृत शंख चक्रः ॥